तृतीयः पाठः

# विजयतां स्वदेशः



**गृह्यतां भगवन्! देशं धर्मं च रक्षितुम्।**

| | |
|---|---|
| दिव्या | अयि सुलभे! पश्य एतत् चित्रम्। कः नु खलु एष महापुरुषः ? |
| सुलभा | दिव्ये! छत्रेण तु राजा इव प्रतीयते। |
| दिव्या | सुलभे! परन्तु अत्र नास्ति सिंहासनम्। |
| प्रकाशः | अयि, किं युवां न जानीथः "अयं मेवाडाधिपतिः प्रतापः वने स्थितः।" |
| सुलभा | कथं प्रतापः निराशः इव दृश्यते ? |
| दिव्या | आम्, निराशः स स्वतन्त्रतायै धनाभावात्। |
| प्रकाशः | अत एव श्रेष्ठी भामाशाहः देशरक्षार्थं सर्वां सम्पत्तिं महाराजाय प्रतापाय अर्पयति। |
| दिव्या | कथं जानासि? |
| प्रकाशः | ननु अस्मात् नाटकात् एव। |
| सुवीरः | अतीव रुचिकरं ननु इदं नाटकं देशभक्त्या ओतप्रोतं च। स्वतन्त्रतादिवसे अस्य एव अभिनयं करिष्यामः। |
| प्रकाशः | आम्। अहम् अद्यैव पात्राणां चयनं करोमि। |
| सर्वे | पठामः तावत् एतं पाठम् अभिनयार्थम्। |

तृतीयः पाठः

# विजयतां स्वदेशः

(मेवाडाधिपतिः महाराणाप्रतापः अरण्ये कतिपयैः विश्वासपात्रैः भटैः सह सङ्कटापन्ने काले विचारमग्नः शिलायाम् उपविष्टः अस्ति। स्वदेशस्य रक्षायै युध्यमानस्य तस्य बहूनि वर्षाणि व्यतीतानि। हन्त! वराकस्य पार्श्वे सेनायाः भोजनसामग्र्याः अपि च अभावः विद्यते। अधुना तु स स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति।)

**प्रतापः** धिङ् माम् अधन्यम्, योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घं निःश्वसिति)

**( यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः )**

**राजपुत्रः** (राजोचितं प्रणम्य) विजयतां महाराजः, विजयताम्।

**प्रतापः** (समाश्वस्य) अयि भ्रातः! कथं जयघोषं कृत्वां मां लज्जयसे?

**राजपुत्रः** देव! कथं भवान् वदति एवम्? किं न खलु कृतं भवता राज्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम्? विजेष्यते ननु भवान्!

**प्रतापः** कुतस्तावद् विजयः! स्वदेशमेव त्यक्तुं तत्परोऽहम्।

**भटः** (अञ्जलिं बद्ध्वा) महाराज! नैवं तावत्। स्वामिभाग्यानाम् अनुगन्तारः वयम्। वयं सर्वे त्वाम् अनुगमिष्यामः।

**प्रतापः** एवं न वक्तव्यम्। कृतज्ञोऽस्मि भवताम् अहम्। वीरैः धीरैः बहु उपकृतं देशस्य। स्वदेशे एव तिष्ठद्भिः भवद्भिः देशस्य स्वतन्त्रतायै प्रयत्नः समाधेयः।

**सर्वे भटाः** देशरक्षायै बद्धपरिकरा वयं तु भवन्तमेव अनुसरिष्यामः।

**प्रतापः** यथा रोचते भवद्भ्यः। प्रदेशोऽयम् अस्माभिः त्याज्यः एव।

**( निस्सरति प्रतापः, भटाः चापि तमनुचरन्ति। तमेवं स्वतन्त्रताप्राप्तिं प्रति निराशं दृष्ट्वा अटवीवासिनो भिल्लाः दुःखीयन्ति )**

**प्रथमः भिल्लः** हा धिक्! कीदृशः समय आगतः! देशभक्तः प्रतापोऽपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः।

**द्वितीयः भिल्लः** न जानेऽस्य मेवाडदेशस्य भाग्ये किं लिखितम्? हा निष्ठुर दैव ! देशभक्ते तु दयस्व।

**तृतीयः भिल्लः** वराकोऽयं जीवनसामग्रीयुद्धसामग्र्योः अभावेन खिद्यते। परमेश्वर! दयस्व! मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः?

**( सर्वे भिल्लाः विलपन्ति )**

**एकः सैनिकः** हा दैव! कथं देशधर्मौ प्रति निष्ठुरः सञ्जातोऽसि? (प्रतापं प्रति) महाराज! मदीयेन एव खड्गेन जहि माम्। न शक्नोमि स्वचक्षुषा द्रष्टुं स्वदेशदुर्दशाम्।

**सर्वे सैनिकाः** परतन्त्रे देशे जीवनं नरकायते। न शक्नुमः प्राणान् धारयितुम्।

(सर्वे आत्मानं हन्तुमुद्यताः)

(एतद् दृश्यं दृष्ट्वा तत्रत्याः भिल्लाः अपि मरणाय तत्पराः भवन्ति)

**प्रतापः** (सैनिकान् भिल्लान् च आत्मघातं कुर्वतः दृष्ट्वा) स्थीयताम्, स्थीयताम्। आत्मघातिनः जनाः तु असूर्यान् लोकान् व्रजन्ति। वीरगत्या मरणमेव कल्याणप्रदं भवति। धैर्येण स्वतन्त्रतायाः उपायाः चिन्तनीयाः।

(नेपथ्ये)

विरम्यतां प्रभो! विरम्यताम्।

**प्रतापः** श्रुतपूर्व इव स्वरः। (सैनिकं प्रति) वृक्षम् आरुह्य दृश्यतां कः एष शब्दापयति?

**सैनिकः** (निपुणं निरीक्ष्य) महाराज! मेवाडमन्त्री भामाशाहः खलु एषः।

**प्रतापः** अये भामाशाहः आगतः! कथमस्माकं दौर्भाग्यं भवताऽपि परिज्ञातम्।

(भामाशाहः धनराशिमादाय आयाति)

**भामाशाहः** (सप्रणामम्) अन्नदातः! सेवकं परित्यज्य कुत्र प्रस्थितो भवान् ?

**प्रतापः** (दीर्घं निःश्वस्य) न क्वापि बन्धो! गन्तुमपि न शक्यते। धनसेनयोः अभावे देशरक्षणाय पर्याकुलाः स्मः।

**भामाशाहः** भवतः चिन्तातुरतां परिज्ञाय भग्नमिव मे हृदयम्। (धनराशिं निर्दिश्य) इयं सम्पतिः खलु कस्मै प्रयोजनाय? ईदृशे एव कर्मणि अस्याः उपयोगः श्रेयान्।

**प्रतापः** सत्यं वदति भवान्।

**भामाशाहः** यद्येवं तर्हि गृह्यताम्। त्रोट्यतां पारतन्त्र्यशृङ्खलाः स्वकीयैः लौहबाहुभिः। स्वतन्त्रः क्रियतां स्वदेशः।

(धनराशिं प्रतापचरणयोः अर्पयति)

**प्रतापः** (साश्चर्यम्) किमिदं भवान् करोति? नाहं दत्तां सम्पत्तिं पुनः आददामि।

**भामाशाहः** (सविनयम्) गृह्यतां भगवन्! देशं धर्मं च रक्षितुम्।

**प्रतापः** धन्योऽसि मन्त्रिवर्य! त्वदीया जननी धन्या। सुकुले जातोऽसि।

(द्वादशवर्षाणि यावत् पञ्चविंशतिसहस्रसैनिकानां पालयित्रीं सम्पत्तिमवलोक्य सैनिकान् प्रति)

अस्मिन्नेव क्षणे स्वदेशं पारतन्त्र्यात् मोचयितुं योत्स्यामहे। (भामाशाहम् अभिलक्ष्य) सखे! एहि गाढं परिष्वजस्व माम्।

**भामाशाहः** अनुगृहीतोऽस्मि।

(उभौ सस्नेहं परस्परमालिङ्गतः)

**सर्वे सैनिकाः-** **धन्योऽस्ति राणा, पुनरस्ति मन्त्री**
**धन्यः द्वयोर्मेलनमस्ति धन्यम्।**
**धन्या वयं स्मः समयश्च धन्यो**
**धन्यं पुनर्दर्शनमस्ति पुण्यम्॥**

विजयतां महाराणा! विजयतां भामाशाहः! विजयतां स्वदेशः!

(पटाक्षेपः)

# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अटवीवासिनः**<br>(वि०)(पुं०प्र०ब०व०)<br>[अटव्यां वसन्ति ये ते (उप०त० पु०)] | वनवासिनः | वन में रहने वाले | those who reside in the forest. |
| **अनुगन्तारः**<br>(वि०) [पुं० प्र०ब०व०] [अनु+गम्+तृच् अनुगन्तृ] | अनुगमनं कर्तारः | अनुसरण करने वाले | followers. |
| **असूर्यान्**<br>(वि०) (पु०द्वि०ब०व०] | असुरैः अधिकृतान् (लोकान्) | आसुरी | places belonging to the evil spirits. |
| **आत्मघातिनः**<br>(वि०)[पुं०, प्र०ब०व०]<br>[आत्मानं घातयन्ति ते (उप०त०पु०)] | आत्महत्यां कुर्वाणाः | आत्महत्या करने वाले | committing suicide. |
| **उपकृतम्**<br>(वि०)(नपुं० प्र०ए०व०][उप+कृ+क्त] | उपकारः कृतः | उपकार किया गया | has been served (the country) been served. |
| **कृतज्ञः**<br>(वि ०) (पुं० प्र०ए०व०)<br>[कृतं जानाति इति उप०त० पु०] | आभारी | किए गए उपकार को मानने वाला | grateful. |
| **खलु**<br>(अव्य०) | निश्चयेन | निश्चय ही | surely, indeed. |
| **खिद्यते**<br>(क्रि०) (खिद् लट् ल०प्र०पु०ए०व०) | दुःखी भवति | दुःखी हो रहा है | is depressed. |
| **गृह्यताम्**<br>(क्रि०) [गृह् कर्म० लो० प्र०पु०ए०व०] | स्वीक्रियताम् | ले लिया जाए | may please be accepted. |
| **जहि**<br>(क्रि०)(हन् लो०म०पु०ए०व०) | वधं कुरु | मार दो | kill. |
| **त्रोट्यताम्**<br>(क्रि०) [त्रुट्+णिच्+कर्मवा०]<br>(लो०प्र०पु०ए०व०) | विभज्यताम्, नाश्यताम् | तोड़ा जाए | may be broken. |

| | | | |
|---|---|---|---|
| **नरकायते**<br>(क्रि०) (लट् प्र० पु०ए०व०]<br>[नरक, नामधातु] | नरकम् इव (कष्टमयं) भवति | नरक जैसा (दु:खदायी) हो रहा है | appearing like hell. |
| **निरीक्ष्य**<br>(अव्य०)[निर्+ईक्ष्+ल्यप्] | परीक्ष्य, ध्यानेन दृष्ट्वा | जाँचकर, देखकर | having examined. |
| **निस्सरति**<br>(क्रि०) [निस्+सृ+लट् प्र०पु०ए०व०] | बहि: गच्छति | निकलता है | goes away. |
| **नेपथ्ये**<br>(सं०) | यवनिकाया: पृष्ठे | पर्दे के पीछे का स्थान जहाँ पात्र वेषभूषा की तैयारी करते हैं | the place behind the stage (separated by a curtain from the Ranga). |
| **पटाक्षेप:**<br>(सं०) (पु०प्र०ए०व०) | [पटस्य आक्षेप: (ष०त०पु०)] | पर्दे का गिरना | fall of the curtain. |
| **परिष्वजस्व**<br>(क्रि०)<br>(परि+ष्वज्, लो० आ० म०पु०ए०व०) | आलिङ्गनं कुरु | गले लगाओ | please embrace. |
| **पर्याकुला:**<br>(वि०)(पुं० प्र०ब०व०)[परि+आकुला:] | विकला: | बेचैन, व्याकुल | disturbed, upset. |
| **प्रस्थित:**<br>(वि०) [प्र+स्था+क्त] (पु०प्र०ए०व०) | गत: | चला गया | went away |
| **बद्धपरिकरा:**<br>(वि ०) | बद्धं कटिवस्त्रं यै: ते (ब्र० वी०) सन्नद्धा: | कमर कसे हुए (तैयार) | ready |
| **भटै:**<br>(सं०)(पुं० तृ०ब०व०) | योद्धृभि: | योद्धाओं के साथ | with warriers. |
| **मोचयितुम्**<br>(अव्य०)[मुच्+णिच्+तुमुन्] | मोचनाय | मुक्त कराने के लिए | to set free. |
| **वराकस्य**<br>(सं०) (पु० ष०ए०व०) | दयनीयस्य | बेचारे के | of the pitiable. |
| **विजेष्यते**<br>(क्रि०)[वि+जि+लृ० प्र०पु०ए०व०(आ०)] | विजयी भविष्यति | जीतेगा | will win. |

| | | | |
|---|---|---|---|
| **विरम्यताम्**<br>(क्रि०)<br>[वि+रम्+कर्मवा० लो०प्र० पु० ए०व०] | स्थीयताम्<br>(न गम्यताम्) | रुकिए | please don't go. |
| **शब्दापयति**<br>(क्रि०) [शब्द (नामधातु)+णिच्, लट्, प्र० पु० ए०व०] | आह्वयति | बुलाता है | calls. |
| **श्रुतपूर्वः**<br>(वि०) (पुं०प्र०ए०व०)<br>[पूर्वं श्रुतः (केवलसमासः)] | पूर्वं श्रुतः | पहले सुना हुआ | heard before. |
| **समाधेयः**<br>(वि०) (पुं०, प्र०ए०व०)<br>(सम्+आ+धा+यत्) | कर्त्तव्यः | कर्त्तव्य करना चाहिए | should be made. |
| **समाश्वस्य**<br>(अव्य०) (सम्+आ+श्वस्+ल्यप्) | सुखेन श्वासं गृहीत्वा | चैन की साँस लेकर | having taken a sigh of relief. |
| **सोढम्**<br>(क्रि०) (नपुं० प्र०ए०व०) [सह्+क्त] | सहनं कृतम् | सहन किया गया | was tolerated |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| सङ्कटापन्ने | = | सङ्कट+आपन्ने | प्राणैरेव | = | प्राणैः+एव |
| धिङ् माम् | = | धिक्+माम् | तावदेव | = | तावत्+एव |
| राजोचितम् | = | राज+उचितम् | तत्परोऽहम् | = | तत्परः+अहम् |
| कुतस्तावद् | = | कुतः+तावत् | जानेऽस्य | = | जाने+अस्य |
| वराकोऽयम् | = | वराकः+अयम् | प्रतापं प्रति | = | प्रतापम्+प्रति |
| प्रस्थितो भवान् | = | प्रस्थितः+भवान् | अस्मिन्नेव | = | अस्मिन्+एव |
| द्वयोर्मेलनम् | = | द्वयोः+मेलनम् | समयश्च | = | समयः+च |
| यद्येवम् | = | यदि+एवम् | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| विश्वासपात्रै:+भटै: | = | विश्वासपात्रैर्भटै: | भटै:+सह | = | भटैस्सह |
| अभाव:+विद्यते | = | अभावो विद्यते | उपविष्ट:+अस्ति | = | उपविष्टोऽस्ति |
| वदति+एवम् | = | वदत्येवम् | भटा:+च+अपि | = | भटाश्चापि |

## संयोग:

| | | | | | |
|---|---|---|---|---|---|
| स्वदेशमेव | = | स्वदेशम्+एव | भवन्तमेव | = | भवन्तम्+एव |
| तमनुचरन्ति | = | तम्+अनुचरन्ति | कथमस्माकम् | = | कथम्+अस्माकम् |
| सम्पत्तिमवलोक्य | = | सम्पत्तिम्+अवलोक्य | परस्परमालिङ्गत: | = | परस्परम्+आलिङ्गत: |



# अभ्यास:

**1. अध: प्रदत्तानां प्रश्नानाम् उत्तराणि एकपदेन लिखत –**

(क) प्रताप: कां रक्षितुम् असमर्थ: आसीत् ? ..................................

(ख) क: दीर्घं नि:श्वसिति ? ..................................

(ग) प्रतापं निराशं दृष्ट्वा के दु:खीयन्ति ? ..................................

(घ) सैनिक: स्वचक्षुषा किं द्रष्टुं न शक्नोति ? ..................................

(ङ) कीदृशे देशे जीवनं नरकायते ? ..................................

(च) आत्मघातिनो जना: कीदृशान् लोकान् व्रजन्ति ? ..................................

(छ) धनराशिं क: आनयति ? ..................................

**2. पूर्णवाक्येन उत्तराणि लिखत –**

(क) प्रताप: किं श्रुत्वा लज्जाम् अनुभवति ?

..........................................................................................................

(ख) कै: देशस्य उपकार: क्रियते ?

..........................................................................................................

(ग) स्वतन्त्रताया: उपाया: कथं चिन्तनीया: ?

..........................................................................................................

(घ) प्रतापः किमर्थं पर्याकुलः आसीत् ?

.............................................................................................................

(ङ) परतन्त्रतायाः शृङ्खलाः कथं त्रोटनीयाः ?

.............................................................................................................

(च) किं किं धन्यम् ?

.............................................................................................................

**3. अधोलिखितकथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) विचारमग्नः महाराणाप्रतापः **शिलायाम्** उपविष्टः आसीत्। ..............................................

(ख) सर्वे भटाः **देशरक्षायै** बद्धपरिकराः आसन्। ..............................................

(ग) भिल्लाः **मातृभूमेः** दुर्दशां नैव द्रष्टुं शक्नुवन्ति। ..............................................

(घ) **भामाशाहः** धनराशिम् आदाय आगच्छति। ..............................................

(ङ) **परतन्त्रे** देशे जीवनं नरकायते। ..............................................

(च) **वीरगत्या** मरणमेव कल्याणप्रदं भवति। ..............................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति।' अस्मिन् वाक्ये कर्तृपदं किम्?

(ख) 'अयि भ्रातः! कथं जयघोषं कृत्वा मां लज्जयसे।' अस्मिन् वाक्ये क्रियापदं किम्?

(ग) 'हा धिक् कीदृशः समयः आगतः।' अस्मात् वाक्यात् 'कीदृशः' इति पदस्य विशेष्यं चिनुत।

(घ) 'न क्वापि बन्धो! गन्तुमपि न शक्यते।' अस्मिन् वाक्ये 'कुत्र' इत्यर्थे किं पदं प्रयुक्तम् ?

(ङ) 'परतन्त्रे देशे जीवनं नरकायते।' अस्मात् वाक्यात् 'स्वतन्त्रे' पदस्य विलोमपदं चिनुत।

(च) 'मदीयेन एव खड्गेन जहि माम्' अत्र 'खड्गेन' पदस्य किं विशेषणपदं प्रयुक्तम् ?

**5. अधोलिखितानां पदानां विलोमपदानि पाठात् चित्वा लिखत–**

(क) धन्यम् (i) ..........................

(ख) दयालुः (ii) ..........................

(ग) प्रसीदति (iii) ..........................

(घ) आत्मरक्षाम् (iv) ..........................

(ङ) परकीयैः (v) ..........................

(च) मदीया (vi) ..........................

(छ) याति (vii) ..........................

**6. मञ्जूषातः समुचितं विशेषणपदं चित्वा लिखत–**

मदीयेन, सङ्कटापन्ने, मेवाडमन्त्री, असूर्यान्, स्वकीयैः, अटवीवासिनः, देशभक्तः

(क) .......................... प्रतापः
(ख) .......................... भामाशाहः
(ग) .......................... काले
(घ) .......................... खड्गेन
(ङ) .......................... भिल्लाः
(च) .......................... लोकान्
(छ) .......................... लौहबाहुभिः

**7. अधः दत्तानां वाक्यानां समक्षं वक्तारं श्रोतारं च निर्दिशत–**

| | वाक्यानि | वक्ता | श्रोता |
|---|---|---|---|
| (क) | विजयतां महाराजः। | .......................... | .......................... |
| (ख) | कथं मां लज्जयसे ? | .......................... | .......................... |
| (ग) | स्वामिभाग्यानाम् अनुगन्तारो वयम्। | .......................... | .......................... |
| (घ) | मदीयेनैव खड्गेन जहि माम्। | .......................... | .......................... |
| (ङ) | नाहं दत्तां सम्पत्तिं पुनः आददामि। | .......................... | .......................... |
| (च) | गृह्यताम् भगवन्! देशं धर्मं च रक्षितुम्। | .......................... | .......................... |

**8. अधोलिखितवाक्यानाम् उचितभावैः सह सम्मेलनं कुरुत–**

| | वाक्यानि | भावः |
|---|---|---|
| (क) | अलं मम एतेन जीवितेन। | ओजः |
| (ख) | वीरैः धीरैः बहु उपकृतं देशस्य। | निराशा |
| (ग) | आत्मघातिनो जनास्तु असूर्यान् लोकान् व्रजन्ति। | धैर्यम् |
| (घ) | त्रोट्यतां पारतन्त्र्यशृङ्खला स्वीकीयैः बहुभिः। | ग्लानिः |
| (ङ) | धैर्येण स्वतन्त्रतायाः उपायाः चिन्तनीयाः। | उत्साहः |

9. **कथाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लिखत-**

(क) सः सेनायाः भोजनसामग्र्याः अभावेन खिन्नः अस्ति।

(ख) जयघोषं श्रुत्वा प्रतापः कथयति-अयि भ्रातः! कथं जयघोषं कृत्वा मां लज्जयसे इति।

(ग) सहचराः महाराणाप्रतापस्य एतादृशीं स्थितिं दृष्ट्वा व्याकुलाः भवन्ति।

(घ) महाराणा प्रतापः अरण्ये विचारमग्नः शिलायाम् उपविष्टः अस्ति।

(ङ) तदैव कश्चित् मेवाडराजपुत्रः तत्र प्रविशति।

(च) तदा राजपुत्रः वदति - स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम्? विजेष्यते ननु भवान्।

(छ) अधुना सः स्वकीयैः प्राणैरेव स्वदेशं स्वतन्त्रं कर्तुम् इच्छति।

(ज) सः राजपुत्रः महाराणाप्रतापस्य जयघोषं करोति।

## अन्वयः

1. **धन्योऽस्ति राणा, पुनरस्ति मन्त्री, धन्यः द्वयोर्मेलनमस्ति धन्यम्।**
**धन्या वयं स्मः समयश्च धन्यो, धन्यं पुनर्दर्शनमस्ति पुण्यम्॥**

**अन्वयः** - राणा धन्यः अस्ति, पुनः मन्त्री (धन्यः) अस्ति। द्वयोः मेलनम् धन्यम् अस्ति। वयम् धन्याः स्मः। समयः च धन्यः। पुनः दर्शनम् पुण्यम् धन्यम् (च) अस्ति।

## योग्यताविस्तारः

1. **'जि' धातोः प्रयोगः सामान्यतः परस्मैपदि भवति, परं यदा अस्य प्रारम्भे 'वि-' उपसर्गः आगच्छति, तदा एष धातुः आत्मनेपदि प्रयुज्यते- यथा**
विजयताम्- वि-उपसर्गः, जि-धातुः, लोट्-लकारः, प्रथमपुरुषे एकवचनम्।
विजेष्यते- वि+जि+लृट्, प्रथमपुरुषे एकवचनम्।

2. **नामधातुः-**
यदा कश्चन शब्दः एव धातुवद् आचरति तदा एष नामधातुः भवति। यथा - दुःखीयन्ति - अत्र दुःखशब्दः क्यच्-प्रत्ययस्य योगं प्राप्य-दुःखीयति भवति, तस्य लटि प्रथमपुरुषे बहुवचने दुःखीयन्ति इति रूपम्।
नरकायते - अत्रापि नरकशब्दः क्यङ्-प्रत्यययोगेन नामधातुः भवति - नरकायते, नरकवत् प्रतीयते।

3. **वाच्यम्**
वाच्यं त्रिविधं भवति -
(i) कर्तृवाच्यम् (ii) कर्मवाच्यम् (iii) भाववाच्यम्

(i) **कर्तृवाच्यम्-** यदा क्रियापदेन कर्ता उच्यते/ निर्दिश्यते।
यथा - भवान् वदति। अस्मिन् वाक्ये कः वदति? अस्य उत्तरे उच्यते-भवान् वदति। अतः इदं वाक्यं कर्तृवाच्ययुक्तम्।

(ii) **कर्मवाच्यम् –** यदा क्रियापदेन कर्म उच्यते/निर्दिश्यते।

यथा – ''त्रोट्यतां पारतन्त्र्यशृङ्खला: स्वकीयै: लौहबाहुभि:।'' अस्मिन् वाक्ये ''त्रोट्यताम्'' इति क्रियापदम्, प्रश्न: अस्ति किं त्रोट्यताम्? उत्तरम् – शृङ्खला: त्रोट्यताम्। अत: इदं वाक्यमस्ति कर्मवाच्ययुक्तम्।

(iii) **भाववाच्यम्-** यत्र केवलं क्रियापदम् एव अर्थे प्रधानम्।

यथा – बालेन हस्यते। अत्र हस्यते इति भावप्रधान:, अत: भाववाच्ययुक्तमिदं वाक्यम्।

**4. 'श्रुतपूर्व:' इत्यत्र द्वौ शब्दौ तद्यथा -वाच्यम्**

पूर्वं श्रुत: – इति श्रुतपूर्व:। अस्मिन् पाठे अयं शब्द: 'स्वर:' इत्यस्य विशेषणमस्ति। अनेन शब्देन सदृशा: शब्दा: सन्ति-दृष्टपूर्व:, कथितपूर्वा, गतपूर्वम्, भूतपूर्व:, ज्ञातपूर्वा।

**5. अत्र पाठे बहव: नाट्यसङ्केता: सन्ति। एतेषाम् अभिनयं कुरुत।**

(i) राजोचितं प्रणम्य।

(ii) समाश्वस्य।

(iii) अञ्जलिं बद्ध्वा।

(iv) सप्रणामम्।

(v) दीर्घं नि:श्वस्य।

## कोऽहं वदतु साम्प्रतम्

**दन्तैर्हीन: शिलाभक्षी निर्जीवो बहुभाषक:।**

**गुणस्यूतिसमृद्धोऽपि परपादेन गच्छति॥**

**भावार्थ: –** दन्ता: न सन्ति पुनरपि पाषाणान् खादति निर्जीव: अस्ति, तथापि बहु वदति। सूत्रेण सीवितम् अस्ति, चेदपि अन्यपादै: चलति।

## एहि हसाम

(एका ग्रामीणा वृद्धा महिला एकदा योकयानेन कुत्रचित् गच्छन्ती आसीत्। तदा अकस्मात् एक: चिटिका-निरीक्षक: याने प्रविशति। एष: चिटिका-निरीक्षक: अस्ति इति सा वृद्धा न जानाति स्म।)

**चिटिका-निरीक्षक:** – (वृद्धां प्रति) कृपया स्वस्य प्रयाण-चिटिकां दर्शयतु।

**वृद्धा** – अहं किमर्थं स्वस्य चिटिकां भवते दर्शयानि? चिटिकां द्रष्टुम् एतावती एव बलवती इच्छा अस्ति चेत् स्वस्य कृते परिचालकात् एकां क्रीणातु।